# अथ दामोदरस्तोत्रम्

मत्स्याकृतिधर जय देवेश वेदविबोधक कूर्मस्वरूप ।
मन्दरगिरिधर सूकररूप भूमिविधारक जय देवेश ॥१॥

काञ्चनलोचन नरहरिरूप दुष्टहिरण्यकभञ्जन जय भो ।
जय जय वामन बलिविध्वंसिन् दुष्टकुलान्तक भार्गवरूप ॥२॥

जय विश्रवसःसुतविध्वंसिन् जय कंसारे यदुकुलतिलक ।
जय वृन्दावनचर देवेश देवकिनन्दन नन्दकुमार ॥३॥

जय गोवर्धनधर वत्सारे धेनुकभञ्जन जय कंसारे ।
रुक्मिणिनायक जय गोविन्द सत्यावल्लभ पाण्डवबन्धो ॥४॥

खगवरवाहन जय पीठारे जय मुरभञ्जन पार्थसखे त्वम् ।
भौमविनाशक दुर्जनहारिन् सज्जनपालक जय देवेश ॥५॥

शुभगुणपूरित जय विश्वेश जय पुरुषोत्तम नित्यविबोध ।
भूमिभरान्तककारणरूप जय खरभञ्जन देववरेण्य ॥६॥

विधिभवमुखसुरसततसुवन्दितसच्चरणाम्बुज कञ्जसुनेत्र ।
सकलसुरासुरनिग्रहकारिन् पूतनिमारण जय देवेश ॥७॥

यद्भ्रूविभ्रममात्रात्तदिदमाकमलासनशम्भुविपाद्यम् ।
सृष्टिस्थितिलयमृच्छति सर्वं स्थिरचरवल्लभ स त्वं जय भो ॥८॥

जययमलार्जुनभञ्जनमूर्ते जय गोपीकुचकुङ्कुमाङ्किताङ्ग ।
पाञ्चालीपरिपालन जय भो जय गोपीजनरञ्जन जय भो ॥९॥

जय रासोत्सवरत लक्ष्मीश सततसुखार्णव जय कञ्जाक्ष ।
जय जननीकरपाशसुबद्ध हरणान्नवनीतस्य सुरेश ॥१०॥

बालक्रीडनपर जय भो त्वं मुनिवरवन्दितपदपद्मेश ।
कालियफणिफणमर्दन जय भो द्विजपत्न्यर्पितमत्सि विभोऽन्नम् ॥

क्षीराम्बुधिकृतनिलयन देव वरद महाबल जय जय कान्त ।
दुर्जनमोहक बुद्धस्वरूप सज्जनबोधक कल्किस्वरूप ।
जय युगकृद्दुर्जनविध्वंसिन् जय जय जय भो जय विश्वात्मन्॥

इति मन्त्रं पठन्नेव कुर्यान्नीराजनं बुधः ।
घटिकाद्वयशिष्टायां स्नानं कुर्याद्यथाविधि ॥
(अन्यथा नरकं याति यावदिन्द्राश्चतुर्दश)

॥ इति दामोदरस्तोत्रम् ॥